# सुन्दरकाण्ड चतुःषष्टितमः सर्गः (६४) - ॥ हनूमाद्यागमनम् ॥

सुग्रीवेणैव मुक्तस्तु हृष्टो दधिमुखः कपिः ।
राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत् ॥ १ ॥

स प्रणम्य च सुग्रीवं राघवौ च महाबलौ ।
वानरैः सह तैः शूरैर् दिवमेवोत् पपात ह ॥ २ ॥

स यथैवागतः पूर्वं तथैव त्वरितं गतः ।
निपत्य गगनाद् भूमौ तद्वनं प्रविवेश ह ॥ ३ ॥

स प्रविष्टो मधुवनं ददर्श हरि यूथपान् ।
विमदानुत्थितान् सर्वान् मेहमानान् मधूदकम् ॥ ४ ॥

स तानुपागमद् वीरो बद्ध्वा कर पुटाञ्जलिम् ।
उवाच वचनं श्लक्ष्ण मिदं हृष्टव दङ्गदम् ॥ ५ ॥

सौम्य रोषो न कर्तव्यो यदेभिरभि वारितः ।
अज्ञानाद् रक्षिभिः क्रोधाद् भवन्तः प्रतिषेधिताः ॥ ६ ॥

युवराजस् त्वमीशश्च वनस्यास्य महाबल ।
मौर्ख्यात् पूर्वं कृतो दोषस्तं भवान् क्षन्तुमर्हति ॥ ७ ॥

आख्यातं हि मया गत्वा पितृव्यस्य तवानघ ।
इहोप यातं सर्वेषा मेतेषां वनचारिणाम् ॥ ८ ॥

स त्वदागमनं श्रुत्वा सहैभिर् हरियूथपैः ।
प्रहृष्टो न तु रुष्टोऽसौ वनं श्रुत्वा प्रधर्षितम् ॥ ९ ॥

प्रहृष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः ।
शीघ्रं प्रेषय सर्वांस्ता निति होवाच पार्थिवः ॥ १० ॥

श्रुत्वा दधि मुखस्येदम् वचनं श्लक्ष्ण मङ्गदः ।
अब्रवीत्तान् हरिश्रेष्ठो वाक्यं वाक्य विशारदः ॥ ११ ॥

शङ्के श्रुतोऽयं वृत्तान्तो रामेण हरियूथपाः ।
तत्क्षमं नेह नः स्थातुं कृते कार्ये परन्तपाः ॥ १२ ॥

पीत्वा मधु यथाकामं विश्रान्ता वनचारिणः ।
किं शेषं गमनं तत्र सुग्रीवो यत्र मे गुरुः ॥ १३ ॥

सर्वे यथा मां वक्ष्यन्ति समेत्य हरियूथपाः ।
तथाऽस्मि कर्ता कर्तव्ये भवद्भिः परवानहम् ॥ १४ ॥

नाज्ञापयितु मीशोऽहं युवराजोऽस्मि यद्यपि ।
अयुक्तं कृत कर्माणो यूयं धर्षयितुं मया ॥ १५ ॥

ब्रुवतश् चाङ्गदस् येवं श्रुत्वा वचन मव्ययम् ।
प्रहृष्टमनसो वाक्य मिद मूचुर् वनौकसः ॥ १६ ॥

एवं वक्ष्यति को राजन् प्रभुः सन् वानरर्षभ ।
ऐश्वर्य मदमत्तो हि सर्वोऽहमिति मन्यते ॥ १७ ॥

तव चेदं सुसदृशं वाक्यं नान्यस्य कस्यचित् ।
सन्नतिर्हि तवाख्याति भविष्यच् छुभ भाग्यताम् ॥ १८ ॥

सर्वे वयमपि प्राप्तास् तत्र गन्तुं कृतक्षणाः ।
स यत्र हरिवीराणां सुग्रीवः पतिरव्ययः ॥ १९ ॥

त्वया ह्यनुक्तैर् हरिभि र्नैव शक्यं पदात्पदम् ।
क्वचिद् गन्तुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते ॥ २० ॥

एवं तु वदतां तेषा मङ्गदः प्रत्यभाषत ।
बाढं गच्छाम इत्युक्त्वा उत्पपात महीतलात् ॥ २१ ॥

उत्पतन्त मनूत्पेतुः सर्वे ते हरियूथपाः ।
कृत्वाकाशं निराकाशं यन्त्रोत् क्षिप्ता इवाचलाः ॥ २२ ॥

तेम्बरं सहसोत्पत्य वेगवन्तः प्लवङ्गमाः ।
विनदन्तो महानादं घना वातेरिता यथा ॥ २३ ॥

अङ्गदे ह्यननु प्राप्ते सुग्रीवो वानराधिपः ।
उवाच शोकोप हतं रामं कमल लोचनम् ॥ २४ ॥

समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः ।
नागन्तुमिह शक्यं तै रतीते समये हि नः ॥ २५ ॥

न मत् सकाश मागच्छेत् कृत्ये हि विनिपातिते ।
युवराजो महाबाहुः प्लवतां प्रवरोङ्गदः ॥ २६ ॥

यद्यप्य कृत कृत्याना मीदृशः स्या दुपक्रमः ।
भवेत्स दीन वदनो भ्रान्त विप्लुत मानसः ॥ २७ ॥

पितृ पैतामहं चैतत् पूर्वकै रभिरक्षितम् ।
न मे मधुवनं हन्या दहृष्टः प्लवगेश्वरः ॥ २८ ॥

कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत ।
दृष्टा देवी न सन्देहो न चान्येन हनूमता ॥ २९ ॥

न ह्यन्यः कर्मणो हेतुः साधनेऽस्य हनूमतः ।
हनूमति हि सिद्धिश्च मतिश्च मति सत्तम ॥ ३० ॥

व्यवसायश्च वीर्यं च सूर्ये तेज इव ध्रुवम् ।
जाम्बवान् यत्र नेता स्या दङ्गदश्च बलेश्वरः ॥ ३१ ॥

हनुमांश् चाप्यधिष्ठाता न तस्य गतिरन्यथा ।
मा भूश् चिन्ता समायुक्तः सम्प्रत् यमित विक्रम ॥ ३२ ॥

ततः किलकिला शब्दं शुश्रावा सन्न मम्बरे ।
हनुमत् कर्म दृप्तानां नर्दतां काननौकसाम् ॥ ३३ ॥

किष्किन्धा मुपयातानां सिद्धिं कथयतामिव ।
ततः श्रुत्वा निनादं तं कपीनां कपि सत्तमः ॥ ३४ ॥

आयताञ्चित लाङ्गूलः सोऽभवद् दृष्टमानसः ।
आजग्मुस्तेऽपि हरयो राम दर्शन काङ्क्षिणः ॥ ३५ ॥

अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ।
तेऽङ्गद प्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः ॥ ३६ ॥

निपेतुर् हरि राजस्य समीपे राघवस्य च ।
हनुमांश्च महाबहुः प्रणम्य शिरसा ततः ॥ ३७ ॥

नियता मक्षतां देवीं राघवाय न्यवेदयत् ॥ ३८ ॥

निश्चितार्थस् ततस् तस्मिन् सुग्रीवः पवनात्मजे ।
लक्ष्मणः प्रीतिमान् प्रीतं बहुमाना दवैक्षत ॥ ३९ ॥

प्रीत्या च रम माणोऽथ राघवः परवीरहा ।
बहुमानेन महता हनूमन्त मवैक्षत ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥